# Yamakabharatam

# યમકભારતમ્

## Document Information

Text title : yamakabhAratam by madhvAchArya

File name : yamakabhAratammadhvAchArya.itx

Category : major_works, sAhitya, krishna

Location : doc_z_misc_major_works

Author : Madhvacharya

Proofread by : Vani V.

Latest update : January 24, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# યમકભારતમ્

ધ્યાયેત્પરમાનન્દં યન્માતા પતિમયદપરમાનન્દમ્ । (ધ્યાયેત્તં પરમાનન્દમ્)
ઉજ્ઝિતપરમાનં દમ્પત્યાદ્યાદ્યાશ્રમૈસ્સદૈવ પરમાનન્દમ્ ॥ ૧॥

યસ્ય કરાલોઽલં ચક્રં કાલઃ પરસ્ય હિ કરાલોલમ્ ।
યસ્ય ગદા પવમાનસ્સન્ યો વ્યાસોઽભવત્સદાપવમાનઃ ॥ ૨॥

યસ્ય રમા ન મનોગં જગૃહે વિશ્વમ્ભરાપિ નમનોઽગમ્ ।
યસ્ય પુમાનાનન્દં ભુઙ્ક્તે યદ્ધામ કપતિમાનાનન્દમ્ ॥ ૩॥

પરમેષુ યદા તેજઃ પરમેષુ ચકાર વાસુદેવોઽજઃ ।
માનધિ બિભ્રત્સુ મનો માઽનધિમાસીન્ન વાસુદેવોઽજઃ ॥ ૪॥

સોઽજનિ દેવક્યન્તે યસ્માદનુકમ્પનાવદેવ ક્યન્તે ।
અવદન્દેવ ક્યં તે ભુવનં હિ સુરાઃ સદૈવ દેવક્યન્તે ॥ ૫॥

નીતો વસુદેવેન સ્વતતેન સ ગોકુલં સવસુદેવેન । (સુવસુદેવેન)
તત્ર યશોદા તનયં મેને કૃષ્ણં સ્વકીયમવદાતનયમ્ ॥ ૬॥

વવૃધે ગોકુલમધ્યાદ્યો દેવો વિશ્વમદ્ભુતાકુલમધ્યાત્ ।
તત્ર ચ પૂતનિકાયા વધમકરોદ્યન્નિજાઃ સુપૂતનિકાયાઃ ॥ ૭॥

અધુનોચ્છકટં લોલી પાદાઙ્ગુષ્ઠેન વાતપેશશકટં લોલી ।
અતનોદ્રક્ષામસ્ય સ્વાજ્ઞાનાદ્ગોપિકા સદેરક્ષામસ્ય ॥ ૮॥

મુખલાલનલોલા તન્મુખગં જગદચષ્ટ સાલનલોલાતત્ ।
નાધ્યૈન્માયામસ્ય જગત્પ્રભોઃ સ્વધિકતતતમાયામસ્ય ॥ ૯॥ (સ્વાધિકતતતમાયામસ્ય)

તસ્ય સુશર્માણ્યકરો દરિણો ગર્ગઃ સદુક્તિકર્માણ્યકરોત્ ।
અવદન્નામાનમયં જગદાદિં વાસુદેવનામાનમયમ્ ॥ ૧૦॥

તસ્ય સખા બલનામા જ્યેષ્ઠો ભ્રાતાઽથ યન્નિજાબલના મા ।
યસ્ય ચ પર્યઙ્કોઽયં પૂર્વતનો વિષ્ણુમજસપર્યં કોઽયમ્ ॥ ૧૧॥

તેન હતો વાતરયસ્તૃણચક્રો નામ દિતિસુતોऽવાતરયઃ ।
હરમાણો બાલતમં સ્વાત્માનં કણ્ઠરોધિનાऽબાલતમમ્ ॥ ૧૨॥

સોऽવનિમધ્યે રઙ્ગન્નરિદરયુગ્બાલરૂપમધ્યેરઙ્ગન્ ।
અમુષન્નવનીતમદઃ સ્વગોકુલે ગોપિકાસુ નવનીતમદઃ ॥ ૧૩॥ (સગોકુલે)

તન્માતા કોપમિતા તમનુસસારાત્મવાદવાકોપમિતા । (તમનુસસારાત્મવાકોપમિતા)
જગૃહે સાનમનં તં દેવં તચ્ચિન્તયૈવ સાનમનન્તમ્ ॥ ૧૪॥

અથ સાન્તરિતામાનં વિષ્ણું વિશ્વોદ્ભવં સદાન્તરિતામાનમ્ ।
અનયદ્દામોદરતાં યોऽરમયત્સુન્દરી નિજામોદરતામ્ ॥ ૧૫॥

ચક્રે સોऽર્જુનનાશં પ્રાપ્નોતિ યત્સ્મૃતિઃ સદાર્જુનના શમ્ ।
તૌ ચ ગતૌ નિજમોકસ્તેનૈવ નુતેન યન્નિજાનિજમોકઃ ॥ ૧૬॥ (યન્નિજોऽનિજમોકઃ)

અથ વૃન્દાવનવાસં ગોપાશ્ચક્રુર્જગત્ક્ષિતાऽવનવાસમ્ ।
તત્ર બકાસુરમારઃ શૌરિરભૂન્નિત્યસંશ્રિતાસુરમારઃ ॥ ૧૭॥

અહનદ્વત્સતનૂકં યોપાલ્લોકં સ્વયત્નવત્સતનૂકમ્ ।
સોપાદ્વત્સાનમરસ્સહાગ્રજો ગોપવત્સવત્સાનમરઃ ॥ ૧૮॥

સ વિભુઃ શ્રીમાનહિકે નનર્ત યસ્ય શ્રમાનમામાનહિકે ।
અકરોન્નદ્યુદકાન્તં કાન્તં નીત્વોરગં સનાદ્યુદકાન્તમ્ ॥ ૧૯॥

હત્વા ધેનુકમૂઢં બલાત્પ્રલમ્બં ચ ખેટ્ સધેનુકમૂઢમ્ ।
વ્રજમાવીદમૃતાશઃ પીત્વા વહ્નિં ચરસ્થિતાદમૃતાશઃ ॥ ૨૦॥ (ચરસ્થિરાદમૃતાશઃ)

ગિરિણા રક્ષાપિ કૃતા વ્રજસ્ય તેન સ્વરક્ષરક્ષાપિકૃતા ।
શક્રાય વ્યઞ્જયતા સ્વાં શક્તિં વિશ્વમાત્મનાऽવ્યઞ્જયતા ॥ ૨૧॥

રેમે ગોપીષ્વરિહા સ મન્મથાક્રાન્તસુન્દરીપીષ્વરિહા ।
પૂર્ણાનન્દૈકતનુઃ સ વિશ્વરુક્પાવનોऽપ્યનન્દૈકતનુઃ ॥ ૨૨॥ (વિશ્વરુક્પાવનોऽપ્યાનન્દૈકતનુઃ)

અથ હતયોર્ગલિકેશ્યોઃ શ્વફલ્કજપ્રાપિતઃ પુરી ગલિકેશ્યોઃ ।
ભઙ્ક્ત્વા ધનુરાજવરં જઘાન તેનૈવ ચ સ્વયં રાજવરમ્ ॥ ૨૩॥

મૃત્નન્ ગજમુગ્રબલં સબલો રઙ્ગં વિવેશ સૃતિમુગ્રબલમ્ । (શ્રુતિમુગ્રબલમ્)
હત્વા મલ્લૌ બલિનૌ કંસં ચ વિમોક્ષિતૌ તતૌ લૌ બલિનૌ ॥ ૨૪॥ (વિમોક્ષિતા તતૌ રૌ બલિનૌ)

પ્રાદાત્સાન્દીપનયે મૃતપુત્રં જ્ઞાનદીપસાન્દીપનયે ।
ગુર્વર્થેऽજ્ઞાનતમઃપ્રભેદિતા નિત્યસમ્ભૃતાऽऽજ્ઞાનતમઃ ॥ ૨૫॥

જિત્વા માગધરાજં તોષિતમકરોત્સદાત્મયોગધરાજમ્ ।
અનુકુર્વન્નિજસદનં ચક્રે રમ્યાં પુરં સુબોધનિજસદનમ્ ॥ ૨૬॥ (રમ્યં)

પ્રસભં સગજબલસ્ય ક્ષત્રસ્યોચ્ચૈસ્સમગધરાજબલસ્ય ।
માનં શિશુપાલવરં હત્વા ભૈષ્મીમવાપા શિશુપાલવરમ્ ॥ ૨૭॥ (ભૈષ્મીમવાપ)

હંસો ડિબિકશ્ચપલાવમુના સંસૂદિતૌ યવનકશ્ચ પલા ।
કીર્તિર્વિમલા વિરતા પ્રતતા વિશ્વાધિપાવનીલાવિરતા ॥ ૨૮॥

સત્યાજામ્બવતીર્યા ભાર્યા વિન્દાદ્યા ભાનુસામ્બવતીર્યાઃ ।
પ્રદ્યુમ્નં મોદરતઃ પ્રાપ જ્યેષ્ઠં હરિઃ સુતં મોદરતઃ ॥ ૨૯॥

યત્પરિવારતયેશા જાતા દેવા નૃપાત્મનાઽરતયેશાઃ ।
યદ્ભરિતં વિષસર્પપ્રભૃતિધ્વાન્તં ન મારુતિં વિષસર્પ ॥ ૩૦॥

યેન હિડિમ્બબકાદ્યા રક્ષોધીશા નિપાતિતા બબકાદ્યાઃ ।
ભીમે પ્રીતિમમેયાં વ્યઞ્જયતા તેન શેષપાતિ મમે યામ્ ॥ ૩૧॥

અથ કૃષ્ણાવરણે તાન્ પ્રામાન્રાજ્ઞોઽશ઼ૃણોત્સદાવરણેતાન્ ।
દ્રષ્ટું યાતસ્સબલસ્તાં ચાનૈષીત્પૃથાસુતાંસ્તતઃ સબલઃ ॥ ૩૨॥

તાનિન્દ્રસ્થલવાસાંશ્ચક્રે કૃષ્ણઃ પુરો નિજસ્થલવાસાન્ । (કૃષ્ણઃ પરો)
સ્વબલોદ્રેચિતમાનૈર્જુગોપ ધર્મં ચ તૈઃ પરાચિતમાનૈઃ ॥ ૩૩॥

વાલિવધાનુનયાય પ્રણયી સખ્યં સુસન્ધેઽનુનયાય ।
વાસવજેન વિશેષાત્ તેનૈવ પુનર્નૃજન્મજેન વિશેષાત્ ॥ ૩૪॥

માતુઃ પરિભવહાઽન્યૈ રાજ્ઞા દ્યુસદામિતશ્ચ પરિભવહાન્યૈ ।
અભવન્નરકમુરારિર્યોઽવાસીદત્સમસ્તનરકમુરારિઃ ॥ ૩૫॥ (અભવન્નરકમુરારિર્યોઽવાત્સી)

નીતો દિવિ દેવવરૈ રેમે સત્યાસમન્વિતોઽદેવવરૈઃ ।
સર્વર્તુવને શશિના નિશિ સત્યાં વાસરે વનેઽશશિના ॥ ૩૬॥

સુરતરુમાપાલિમતાત્ પ્રકાશયન્ શક્તિમાત્મનઃ પાલિમતાત્ ।
સુરવરવીરેષુ દરી પ્રધાનજીવેશ્વરઃ પરેષુદરી ॥ ૩૭॥

પુરમભિયાયારિદરી દત્ત્વા ભદ્રાં પૃથાસુતાયારિદરી ।
શક્રપુરીમભિયાતઃ પ્રાદાદ્વહ્નેર્વનં સતામભિયાતઃ ॥ ૩૮॥

શિવભક્તપ્રવરાદ્યં પુમાન્ન સેહે ગિરી શવિપ્રવરાદ્યમ્ । (ગિરિ)
તં સ્વાત્મેન્દ્રવરેણ વ્યધુનોદ્ભીમેન ધૂતરુદ્રવરેણ ॥ ૩૯॥

યસ્યાજ્ઞાબલસારૈઃ પાર્થૈર્દિગ્ભ્યો હૃતં ધનં બલસારૈઃ ।
જિત્વા ક્ષ્મામવિશેષાં પ્રસહ્ય ભૂપાન્ સમસ્તકામવિશેષામ્ ॥ ૪૦॥

અથ પાર્થાન્ ક્રતુરાજં પ્રાપયદમરેટ્ સરુદ્રશક્રતુરાજમ્ ।
પૂજા તેનાવાપિ છિન્નશ્ચૈદ્યઃ સૃતિં ગતેનાવાપિ ॥ ૪૧॥

નિહતૌ સૌભકરૂશૌ શીતો ભાતશ્ચ યેન તૌ ભકરૂશૌ ।
અજયદ્રુદ્રં ચ રણે બાણાર્થેઽવનતિપતિતકચન્દ્રં ચરણે ॥ ૪૨॥

અસૃજજ્જ્વરમુગ્રતમઃક્ષયપ્રદો લીલયાઽધિવરમુગ્રતમઃ ।
ક્રીડામાત્રં વિશ્વં પ્રકાશયન્નાત્મનઃ સ વિહરકમાત્રં વિશ્વમ્ ॥ ૪૩॥

યસ્યાવેશોરુબલાન્યહનત્પાર્થોઽસુરાન્પ્રજેશોરુબલાન્ ।
વરદાનાદસ્યૈવ જગત્પ્રભોરીરણાત્સમનુગતનાદસ્યૈવ ॥ ૪૪॥

યસ્યાવેશાત્સબલઃ પ્રચકર્ષ પુરં પ્રસહ્ય ચેશાત્સબલઃ ।
કુરુપતિનામ નુ યમુનાઽઽકૃષ્ટા યેનાહુરર્ઘ્યમતનુ યમુના(૧) ॥ ૪૫॥ (યેનાહુરર્ઘ્યમતનુ)
(૧. અતનુ યં ઉના, ય અર્થાત્ પૂજ્ય, ઉ અર્થાત્ રુદ્રં)

યદ્બલવાન્ ક્રોધવશાન્નિનાય નાશં વૃકોદરઃ ક્રોધવશાન્ ।
લેભેઽચાન્યાગમ્યં સ્થાનં પુષ્પાણિ ધામ ચાન્યાગમ્યમ્ ॥ ૪૬॥

યદ્બલભારવહત્વાન્નાચલદુરગાદિભિઃ સુભારવહત્વાત્ ।
ધર્માદરિહાઽપિ પદં ભીમો યેનૈવ સાહસં રિહાઽઽપિ પદમ્ ॥ ૪૭॥ (લિહાઽઽપિ)

ન હિ નહુષોઽલં નહિતું ધર્મો દ્રૌણિસ્તથેતરોઽલં નહિતુમ્ ।
નો રાટ્ કર્ણો બ્રહ્મવરી યેન ધ્વસ્તોઽસ્ત્રમગ્રહીત્સબ્રહ્મવરી ॥ ૪૮॥ (સુબ્રહ્મવરી)

ક્ષાત્રં ધર્મં સ્વવતા ગુરુવૃત્ત્યૈ કેશવાજ્ઞયા ચ ચરમં સ્વવતા ।
સર્વં સેહેઽમનસા ભીમેનૈશૈકમાનિના હેમનસા ॥ ૪૯॥ (ભીમેનેશૈકમાનિના)

યદ્ભક્તપ્રવરેણ પ્રોતઃ સ્વસ્મિન્ સ કીચકઃ પ્રવરેણ ॥

પતિતાસ્તસ્ય સહાયાઃ કૃષ્ણાર્થે માનિનઃ સમસ્ય સહાયાઃ ॥ ૫૦॥

યદ્ભક્ત્યાઽનુગૃહીતૌ પાર્થો ભીમશ્ચ ગોનૃપૌ નુ ગૃહીતૌ ।
ઋણમુક્ત્યૈ સુવ્યત્યસ્ત્યૈ ક્રમશો વીરાવમુચ્ચતાં સુવ્યત્યસ્ત્યૈ ॥ ૫૧॥

યદ્ભક્ત્યાઽમિતયાલં કૃષ્ણા કાર્યે વિવેશ કૃષ્ણાઽઽકાર્યે ।
યામીરાર્ધતનુત્વાન્નાપાદ્ભીમાદૃતેઽપિ નાઽપાદ્ભીમાત્ ॥ ૫૨॥

યાં સ્પ્રષ્ટુમિચ્છન્તમજાતશત્રું ન્યવારયત્સ્વઃસ્થમજાતશત્રુમ્ ।
શંરૂપા ને નિત્યરતેરિયં શ્રીરિતિ સ્મ દેવેઽપ્યદિતેરિયં શ્રીઃ ॥ ૫૩॥ (શંરૂપ્ય)

મનસામનસાઽમનસા મનસા યમનન્તમજસ્રમવેદનુયા ।
વિલયં વિલયં વિલયં વિલયન્નિખિલં ત્વશુભં પ્રચકાર ચ યા ॥ ૫૪॥ (પ્રચકાર ચ યઃ)

સોઽગાદ્દૂતમુખેન પ્રમુણેદં વર્તતે યદૂતમુખેન ।
પાર્થાર્થે બહુતનુતાં યત્ર પ્રકાશયત્ સ્વયં સબહુતનુતામ્ ॥ ૫૫॥ (પ્રાકાશયત્)

ગુરુકર્ણનદીજાદીનવધીચ્ચક્ષુર્બલેન જનદીજાદી । (જનદીજાન્)
શક્ત્યા નિજયા પરવાન્ સ્વજનાનુદ્વેચયન્નનન્તયાઽપરવાન્ ॥ ૫૬॥

યસ્ય સુનીતિસહાયાન્ન રિપૂન્મેનેઽર્જુનઃ સમેતસહા યાન્ ।
અકરોચ્ચાસુ પરાસુપ્રતતિં સેનાસુ ધાવનાસુપરાસુ ॥ ૫૭॥

યેન જયદ્રથમારઃ પાર્થઃ શત્રૂનવાપતદ્રથમારઃ । (પાત્રા)
યદ્વિરહાદપિ દેહે સ રથઃ શશ્વત્ સ્થિતેઃ સદાદપિ દેહે ॥ ૫૮॥

યદ્ભરિતો ભરતાભઃ પ્રભુરમ્ભાભાવિતોઽભિભરતાભઃ ।
ભીમો રભસાઽભિભવી પ્રસભં ભાભાભિભૂર્ભાસા ભિભવી ॥ ૫૯॥

યદનુગ્રહપૂર્ણત્વાદ્ ભીમઃ સર્વાનરીનનહિપૂર્ણત્વાઽઽત્ । (યદનુગ્રહિપૂર્ણત્વાદ્)
અદહદ્બાહુબલેન ક્રોધાગ્નાવાહિતાન્નિજાહુબલેન ॥ ૬૦॥

કૃષ્ણાભીમાપ્તતમઃ શીર્ણં યેન સ્વકીયહૃદયમાપ્તતમઃ ।
ધૃતરાષ્ટ્રસુતાનવધીદ્ ભીમેન સ્થાપિતો મનસિ સુસુતાનવધીત્ ॥ ૬૧॥

ભીમનિપાતિતદેહાનદર્શયત્સ્વાનરીન્ વિપાતિતદેહાન્ । (ભીમવિપાટિત, વિપાટિતદેહાન્)
કૃષ્ણાયા હિતકારી સમ્યગ્ધીરપ્રિયઃ સદાઽહિતકારી ॥ ૬૨॥ (સમ્યગ્ગીરપ્રિયઃ)

અથ હરિણાઽપીતબલં દ્રૌણેરસ્ત્રં મહારિણા પીતબલમ્ ।
દધતાઽવાસોમરણં નીતં ચક્રેઽભિમન્યુજં સોમરણમ્ ॥ ૬૩॥

તસ્ય ચ રક્ષા સુકૃતા જનાર્દનેનેશશેષકેક્ષાસુકૃતા ।
પાર્થેષુ પ્રેમવતા નિત્યં ભર્ત્રાઽસુતાસુવિપ્રેમવતા ॥ ૬૪॥

જ્ઞાનં પરમં પ્રાદાદ્ભીષ્મગતઃ સૃતિવિમોક્ષચરમં પ્રાદાત્ ।
પાણ્ડુસુતાનામધિકં ચક્રે વેદં ગુણોત્તરં સ્વનામધિકમ્ ॥ ૬૫॥

તેનાવાપિ સુજાતૈર્હરિમેધસ્તુરગાવર્તનેઽપિ સુજાતૈઃ । (સુજાતૈર્હયમેધસ્તુરગાવર્તનેઽપિ)
પાણ્ડુસુતૈઃ સવસૂકૈરાપ્તૈર્વ્યાસાત્મના ચ સુસવસૂકૈઃ ॥ ૬૬॥

તદનુ સુપાણ્ડુતનૂજૈ રેમે ક્ષ્માં પાલયન્ સુપાણ્ડુતનૂજૈઃ ।
અનુપમસુખરૂપોઽજઃ પરમઃ શ્રીવલ્લભઃ સ્વધિકરૂપોજઃ ॥ ૬૭॥ (સતિ સુખરૂપોજઃ)

સુગતિં પરમામદદાન્નિજયોગ્યાં જ્ઞાનિસુતતિપરમામદદાત્ ।
(ચરમામદદાન્નિજયોગ્યાં જ્ઞાનિસુતતિમ્પરમામદદાત્)
પાર્થાનાં સયદૂનાં સ પિતૃપ્રેષ્યાદિનામિનાં સયદૂનામ્ ॥ ૬૮॥

રેમે તત્રાપિસુખી પરમોઽનન્તો નનન્દ તત્રાપિસુખી ।
પ્રાણેનેન્દિરયા ચ પ્રયુતો નિત્યં મહાગુણેન્દિરયા ચ ॥ ૬૯॥

એવં સર્વાણિ હરે રૂપાણિ શ્રીપતેઃ સુપર્વાણિહરેઃ ।
પૂર્ણસુખાનિ સુભાન્તિ પ્રતતાનિ નિરન્તરાણિ સુભાન્તિ ॥ ૭૦॥

રામ રામ મહાબાહો માયા તે સુદુરાસદા ।
વાદસાદદ કો લોકે પાદાવેવ તવાસજેત્ ॥ ૭૧॥

જેત્સવાતવ વેદાપાકેલોકોદદ સાદવા ।
દાસરાદુસુતેયામાહોબાહા મમ રામ રા ॥ ૭૨॥ (રામ રાઃ)

દેવાનાં પતયો નિત્યં નો મતં યસ્ય જાનતે । (મતં યસ્ય ન જાનતે)
તસ્મૈ દેવ નમસ્યેઽહં ભવતેઽસુરમારયે ॥ ૭૩॥

સમસ્તદેવજન કવાસુદેવપરામૃત ।
વાસુદેવ પરામૃત જ્ઞાનમૂર્તે નમોઽસ્તુ તે ॥ ૭૪॥

દેવાદે દેવલોકપ પૂર્ણાનન્દમહોદધે ।
સર્વજ્ઞેશ રમાનાથ દેવાઽઽદેદેવલોકપ ॥ ૭૫॥

યોનિર્મમેશેષપુરાણવિદ્યાં યોનિર્મમેશેષપુરાણવિદ્યામ્ ।
યોનિર્મમેશેષપુરાણવિદ્યાં યોનિર્મમેશેષપુરાણવિદ્યામ્ ॥ ૭૬॥

અનન્તપારામિતવિક્રમેશ પ્રભો રમાપારમનન્તપાર ।
મહાગુણાઢ્યાપરિમેયસત્ત્વ રમાલયાશેષમહાગુણાઢ્ય ॥ ૭૭॥

ભાભાભાભાભાભાભાભાભાભાભાભાભાભાભાભા ।
ભાભાભાભાભાભાભાભાભામાભાભાભાભાભાભાભા ॥ ૭૮॥

નૈવ પરઃ કેશવતઃ પરમાદસ્માત્સમશ્ચ સુકેશવતઃ ।
સોઽયં શપથવરો નઃ શશ્વત્સન્ધારિતઃ સુશપથવરોઽનઃ ॥ ૭૯॥

કૃષ્ણકથેયં યમિતા સુખતીર્થેનોદિતાઽનને ને યં યમિતા । (સુખતીર્થેનોદિતાઽનેને)
ભક્તિમતા પરમેશે સર્વોદ્રિકાત્સદાનુતાઽઽપ રમેશે ॥ ૮૦॥ (સર્વોદ્રિકાત્સદાવતાઽઽપ)

ઇતિ નારાયણનામા સુખતીર્થસુપૂજિતઃ સુરાયણના મા । (સુઽવકતીર્થેસુપૂજિતઃ નારાયણના)
પૂર્ણગુણાધિક પૂર્ણજ્ઞાનેચ્છાભક્તિભિઃ સ્વધિક પૂર્ણ ॥ ૮૧॥

(પૂર્ણગુણૈરધિક પૂર્ણજ્ઞાનેચ્છાશક્તિભિઃ સ્વધિક પૂર્ણઃ)

॥ ઇતિ શ્રીમન્મધ્વાચાર્યવિરચિતં યમકભારતં સમ્પૂર્ણમ્ ॥

કૃષ્ણકથા

Proofread Vani V.

---

*Yamakabharatam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*